# Vishvanatha Nagari Stotram or Kashi Ashtakam

# વિશ્વનાથનગરીસ્તોત્રમ્ અથવા કાશ્યષ્ટકમ્

## Document Information

Text title : Vishvanatha Nagari Stotram or Kashi Ashtakam 1

File name : vishvanAthanagarIstotram.itx

Category : shiva, shankarAchArya, aShTaka

Location : doc_shiva

Author : Shankaracharya

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225. Expanded as Kashyashtakam

Latest update : July 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 23, 2023

*sanskritdocuments.org*

Vishvanatha Nagari Stotram or Kashi Ashtakam

# વિશ્વનાથનગરીસ્તોત્રમ્ અથવા કાશ્યષ્ટકમ્

શ્રીગણેશાય નમઃ ॥

સ્વર્ગતઃ સુખકરી દિવૌકસાં શૈલરાજતનયાઽતિવલ્લભા ।
ઢુણ્ઢિભૈરવવિદારિતવિઘ્ના વિશ્વનાથનગરી ગરીયસી ॥ ૧॥

યત્ર દેહપતનેન દેહિનાં મુક્તિરેવ ભવતીતિ નિશ્ચિતમ્ ।
પૂર્વપુણ્યનિચયેન લભ્યતે વિશ્વનાથનગરી ગરીયસી ॥ ૨॥

સર્વદાઽમરગણૈશ્ચ વન્દિતા યા ગજેન્દ્રમુખવારિતવિઘ્ના । (સર્વદા હ્યમરવૃન્દવન્દિતા)
કાલભૈરવકૃતૈકશાસના વિશ્વનાથનગરી ગરીયસી ॥ ૩॥

યત્ર તીર્થમમલાં મણિકર્ણિકા સા સદાશિવસુખપ્રદાયિની ।
યા શિવેન રચિતા નિજાયુધૈર્વિશ્વનાથનગરી ગરીયસી ॥ ૪॥

(યત્ર મુક્તિરખિલૈસ્તુ જન્તુભિર્લભ્યતે સ્મરણમાત્રતઃ શુભા ।
સાખિલામરગણસ્પૃહણીયા વિશ્વનાથનગરી ગરીયસી ॥ ૫॥)
સર્વતીર્થકૃતમજ્જનપુણ્યૈર્જન્મ જન્મસુકૃતૈઃ ખલુ લભ્યા ।
પ્રાપ્યતે ભવભવાર્તિનાશિની વિશ્વનાથનગરી ગરીયસી॥ ૫॥

યત્ર શક્રનગરી તનીયસી યત્ર ધાતૃનગરી કનીયસી।
યત્ર કેશવપુરી લઘીયસી વિશ્વનાથનગરી ગરીયસી॥ ૬॥

યત્ર દેવતટિની પ્રથીયસી યત્ર વિશ્વજનની પટીયસી।
યત્ર ભૈરવકૃતિર્બલીયસી વિશ્વનાથનગરી ગરીયસી ॥ ૭॥

વિશ્વનાથનગરીસ્તવં શુભં યઃ પઠેત્ પ્રયતમાનસસ્સદા ।
પુત્રદારગૃહલાભમવ્યયં મુક્તિમાર્ગમનઘં લભેત્સદા ॥ ૮॥

ઉરગં તુરગં ખગં મૃગં વા કરિણં કેસરિણં ખરં નરં વા ।
સકૃદાપ્લુત એવ દેવનદ્યાં લહરી કિં ન હરં ચરીકરોતિ ॥ ૯॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં વિશ્વનાથનગરીસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીવેદવ્યાસવિરચિતકાશ્યષ્ટકમ્ (?)

The original verses as given in Reference 1

શ્રીગણેશાય નમઃ ॥

યત્ર દેવપતિનાપિ દેહિનાં મુક્તિરેવ ભવતીતિ નિશ્ચિતમ્ ।
પૂર્વપુણ્યનિચયેન લભ્યતે વિશ્વનાથનગરી ગરીયસી ॥ ૧॥

સ્વર્ગતઃ સુખકરી દિવૌકસાં શૈલરાજતનયાઽતિવલ્લભા ।
ઢુણ્ઢિભૈરવવિદારિતવિઘ્ના વિશ્વનાથનગરી ગરીયસી ॥ ૨॥

યત્ર તીર્થમમલં મણિકર્ણિકા સા સદાશિવસુખપ્રદાયિની ।
યા શિવેન રચિતા નિજાયુધૈર્વિશ્વનાથનગરી ગરીયસી ॥ ૩॥

સર્વદા હ્યમરવૃન્દવન્દિતા યા ગજેન્દ્રમુખવારિતવિઘ્ના ।
કાલભૈરવકૃતૈકશાસના વિશ્વનાથનગરી ગરીયસી ॥ ૪॥

યત્ર મુક્તિરખિલૈસ્તુ જન્તુભિર્લભ્યતે સ્મરણમાત્રતઃ શુભા ।
સાખિલામરગણસ્પૃહણીયા વિશ્વનાથનગરી ગરીયસી ॥ ૫॥

ઉરગં તુરગં ખગં મૃગં વા કરિણં કેસરિણં ખરં નરં વા ।
સકૃદાપ્લુત એવ દેવનદ્યાં લહરી કિં ન હરં ચરીકરોતિ ॥ ૬॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં વિશ્વનાથનગરીસ્તોત્રં સમ્પૂર્ણમ્ ॥

The original VishvanAthanagarI stotram was
expanded as kAshyaShTakam for similarity
of verses and second reference.
Proofread by PSA Easwaran

*Vishvanatha Nagari Stotram or Kashi Ashtakam*
pdf was typeset on July 23, 2023

Please send corrections to *sanskrit@cheerful.com*